# ॥ गोविन्दाष्टकं ॥

.. govindAShTakaM ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : govindAShTakaM
File name : govind8.itx
Category : aShTaka
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Ashwini Kshirasagar ak201 at hslmc.cam.ac.uk
Proofread by : Ashwini Kshirasagar ak201 at hslmc.cam.ac.uk
Latest update : November 1, 2010
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ गोविन्दाष्टकं ॥

॥ श्रीगोविंदाष्टकम् ॥

सत्यं ज्ञानमनंतं नित्यमनाकाशं परमाकाशम् ।
गोष्ठप्राङ्गणरिङ्खणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारम् ।
क्ष्माया नाथमनाथं प्रणमत गोविंदं परमानंदम् ॥ १॥

मृत्स्नामत्सीहेति यशोदाताडनशैशव संत्रासम् ।
व्यदितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम् ।
लोकत्रयपुरमूलस्तंभं लोकालोकमनालोकम् ।
लोकेशं परमेशं प्रणमत गोविंदं परमानंदम् ॥ २॥

त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नम् ।
कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ।
वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासम् ।
शैवं केवलशांतं प्रणमत गोविंदं परमानंदम् ॥ ३॥

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपालम् ।
गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् ।
गोभिर्निगदित गोविंदस्फुतनामानं बहुनामानम् ।
गोपीगोचरपथिकं प्रणमत गोविंदं परमानंदम् ॥ ४॥

गोपीमंडलगोष्ठिभेदं भेदावस्थमभेदाभम् ।
शश्वद्गोखुरनिर्धूतोद्धतधूलीधूसरसौभाग्यम् ।
श्रद्धाभक्तिगृहीतानंदमचिन्त्यं चिंतितसद्भावम् ।
चिंतामणिमहिमानं प्रणमत गोविंदं परमानंदम् ॥ ५॥

स्नानव्याकुलयोशिद्वस्त्रमुपादायागमुपारूढम् ।
व्यदित्संतिरथ दिग्वस्त्रा ह्युपुदातुमुपाकर्षंतम् ।
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरंतस्थम् ।
सत्तामात्रशरीरं प्रणमत गोविंदं परमानंदम् ॥ ६॥

कांतं कारणकारणमादिमनादिं कालमनाभासम् ।
कालिंदीगतकालियशिरसि मुहुर्नृत्यंतं नृत्यंतम् ।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नम् ।
कालत्रयगतिहेतुं प्रणमत गोविंदं परमानंदम् ॥ ७॥

वृंदावनभुवि वृंदारकगणवृन्दाराध्यं वंदेऽहम् ।
कुंदाभामलमंदस्मेरसुधानंदं सुहृदानंदम् ।

वंद्याशेषमहामुनिमानसवंद्यानंदपदद्वंद्वम् ।
वंद्याशेषगुणाब्धिं प्रणमत गोविंदं परमानंदम् ॥ ८॥

गोविंदाष्टकमेतदधीते गोविंदार्पितचेता यो ।
गोविंदाच्युत माधव विष्णो गोकुलनायक कृष्णेति ।
गोविंदाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघो ।
गोविंदं परमानंदामृतमंतःस्थं स तमभ्येति ॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं श्रीगोविंदाष्टकं सम्पूर्णम् ॥

Encoded and proofread by Ashwini Kshirasagar ak201 at hslmc.cam.ac.uk

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. govindAShTakaM ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*